International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(1): 240-242
© 2026 IJMH
www.themultijournal.com

Received: 11-02-2026
Accepted: 25-02-2026
Publish : 27-02-2026

**डॉ.पवित्रकुमारनन्दः**
अध्यापकः, संस्कृतविभागः,
नयागडप्रजामण्डलमहिलामहा-
विद्यालयः, नयागड

**Correspondence:**
**डॉ.पवित्रकुमारनन्दः**
अध्यापकः, संस्कृतविभागः,
नयागडप्रजामण्डलमहिलामहा-
विद्यालयः, नयागड

# प्राचीनसाहित्ये शारीरिकमाध्यात्मिकोत्कर्षतायै सूर्योपासनायाः एकं शास्त्रीयमनुशीलनम्

**डॉ.पवित्रकुमारनन्दः**

**शोधसारः**

शारीरिकमाध्यात्मिकभौतिकचेतनायाः प्रेरणास्रोतस्त्वेन सूर्यो भारतीयसंस्कृतौ प्राचीनकालादेतावत् पर्यन्तं समेषां नित्यनैमित्तिककाम्यकर्मणां प्रधानाराध्यदेवस्त्वेन वैदिकयागपद्धतेरपि भौतिकाग्नित्वेन तस्यैव प्रतिपत्तिः आहवनीयगार्हपत्यदाक्षिणात्याद्यग्नौ एकत्वसंहननं विधीयते। असौ सूर्यः प्राचीनज्योतिस्सिद्धान्तं पुरस्कृत्य कालमानस्य प्रतीकभूतश्चेति विप्रतिपत्तिर्न लक्ष्यते। औषधिभ्यः प्राणस्वरूपमादित्यो रश्मिभिः प्रत्येकं प्राणिष्वन्तः जीवनस्य प्रतिस्पन्दनं विदधाति। शारीरिक-मानसिकभौतिकोत्कर्षतायै अस्य भूमिका सायंप्रातः अनुष्ठीयमानकर्मविशेषेषु बहुधा श्लाघ्यते। प्राचीनसाहित्यस्याध्ययनाद् बहूनां रोगाणां कुष्ठादीनां प्रमुखव्याधीनां निराकरणे सूर्यस्य स्तुतिः सूर्यरश्मेश्च महती भूमिका बभूव। शारीरिकमाध्यात्मिकोत्कर्षतायै सवितृदेवस्योपास्यत्वं शास्त्रीय-विधावपि बहुधा वर्णितम्। तमसो दूरीकरणं विधाय द्यावापृथिवीमयं सूर्यः स्वप्रकाशेन द्योत्ययन् सर्वप्राणीनामुत्प्रेरकत्वेन प्रत्यक्षमनुभूयदेवत्वे अस्य प्रसक्तिः शास्त्रीयपरिप्रेक्ष्ये प्रसज्यते।

**प्राचीनशास्त्रीयपरिप्रेक्ष्ये सूर्यः**

अग्निहोत्रादिनित्यनैमित्तिककर्मणां साक्षादर्घ्यप्रापकज्योतिस्स्वरूपविश्वचक्षुषस्त्वेन भगमित्रसूर्या-दित्यसविताप्रसविताऽऽदि भूयो भूयः संसेव्यमाने सति श्रुतौ साक्षद् ब्रह्मेति पदेन बहुधा सूर्यात्मकस्य सर्वप्रकाशमानदेवस्य प्रतिपत्तिः 'अग्निज्योतिषं त्वा वायुमतिं प्राणवती◌ं' 'सूर्यज्योतिषं त्वा वायुमतिं प्राणवतिम◌िति मन्त्रवर्णैः स्पष्टं प्रतिपाद्यते। असौ सूर्यः वैदिकसंस्कृतौ सांयप्रातः नित्याग्निहोत्रैः सेव्यः शारीरिकमाध्यात्मिकप्रकर्षतायै उपास्यः सर्वलोकानां जाग्रतरूपावस्थायाः साधकश्चेति बहुधा परब्रह्मवाचकत्वेन **आदित्यो ब्रह्मेति**[1] मन्त्रवर्णैः स्तूयते। उच्यते यजुर्वेदे

**हिरण्यपाणिः सविता विचर्षणिरुभे द्यावापृथिवी अन्तरीयते।**
**अपामीवां बाधते वेति सूर्यमभि कृष्णेन रजसा द्यामृणोति॥**[2]

अस्य शाब्दिकार्थः निरुक्तादिषु शास्त्रेषु दैवतकाण्डप्रसङ्गे बहुधा **सूर्य सूतेर्वा सुवर्तर्वा**[3], **सुष्ठु ईर्यते प्रकाशप्रवर्षणादि व्यापारेषुप्रेर्यत इति सूर्यः** [4] इति व्यपदिश्यते। किञ्चान्यत् निघण्टावपि व्युत्पत्तिरस्य **स्वरति आचरति कर्म स्वीर्चते अर्च्यते भक्तौरिति सूर्यः**[5] व्याचक्षे। यतः शास्त्रान्तरेषु व्याख्यानप्रसङ्गे बहुधा अस्य व्यवहारो बहुभिः प्रोक्तो वर्तते। यच्च **सूते श्रियमिति सूर्यः**[6], शौनकेनोक्तं **सूर्यः सरति भूतेषु सुवीरयति तानि वा सु ईर्यत्वाय यो ह्योः सर्वकर्माणीति।**[7]

सिद्धान्तकौमुदौ कृत्यप्रकरणे सिद्धिकारकस्त्वेनसरति (गच्छति) आकाशे इति सूर्येति भ्वादिगणे यदा षू प्रेरण तुदादिगणे कयपो रुट् सुवति कर्मणि लोवंप्प्रेरयतीति सूर्यः इति वर्णितो वर्तते। अन्यच्चापि कथ्यते सर्वेषां प्राणीनां प्रेकत्वात्सविताप्रसवितेति सवनाद्वा सर्वभावानां प्रचोदयितृत्वेन सूर्यः स्तूयते। अन्धतमः प्रभावात्प्राणीनां प्राणसञ्चरणत्वं सूर्यस्य आभासकाशादेव प्रभवति। उच्यते

**सविता सर्वभावानां सर्वभावांश्च सूचते।**
**सवनात् प्रेरणाच्चैव सविता तेन चच्यते ॥**[8]

वेदाङ्गसाहित्यस्य मूर्धन्यभूतग्रन्थेषु सूर्यसिद्धान्तादिषु बहुधा सूर्यस्य कालमाने सति ज्योतिरूपाख्यं तत्त्वं संसेव्य सूर्यस्यैव परब्रह्मत्वेन चतुर्वेदमूर्त्तित्वमृग्यजुसामभैषजाख्यवेदरूपत्वं विजहाति।

**आदित्यो ह्यादिभूतत्वात् प्रसूत्या सूर्यं उच्यते।**
**परं ज्योतिस्तमः पारे सूर्योऽयं सवितेति च ॥**[9]

**नत्वा सूर्य परं धाम ऋग्यजुः सामरूपिणम् ॥**[10]

सवितुः उदयनान्तो भूतानां प्राणेषु ज्योतिरूपाख्यं तत्त्वं विदधाति। अस्ताचले जाते भूतेषु तमसः भावस्य उद्रेकं भवति। सर्वेषां जनिमतां प्राणाधेयकत्वेन सूर्यस्य प्रसक्तिस्तु वैदिकमन्त्रद्रष्टुभिः दर्शितम्। अतः कथ्यते

**योऽसौ तपन्नुदेति स सर्वेषां भूतानां प्राणानाहायोहेति।**
**असौ योऽस्तमेति स सर्वेषां भूतानां प्राणानादायास्तमेति ॥**[11]

अन्येषु क्रियाविधावपि सूर्यस्य प्रसक्तिः देवानां कृते प्रदत्तमन्नं वसुरुद्रादीनां कृते प्रदत्तं सायंप्रातः अग्निष्टोमे जलादीनां प्रापयितात्वेन श्लाघ्यते। अतः अस्मिन् विषये कथ्यते यत् -

**समिदसि सूर्य्यस्त्वा पुरस्तात् पातुं कस्याश्चिदभिशस्त्यै।**
**देवेभ्यऽआत्वा वसवो रुद्रादित्याः सदन्तु।**[12]

**अर्चन्तं एके महि साममन्वत तेन सूर्यमरोचयन्।**[13]

वैदिकसंस्कृतौ आध्यात्मिकार्थे सूर्यस्य प्रसक्तिस्तु ज्योतिषां पतित्वेन विश्वश्चक्षुषस्त्वेन व्यज्यते। साक्षात् देदीप्यमानो भास्वान् समस्तान् लोकान् प्रदीप्तं कृत्वा वनस्पतीनां प्राणाधेयकत्वं विदधाति। तदर्थं तस्य सूर्यस्याध्यात्मिकतादृष्ट्या बहुधा विविदिश्यन्ते। उच्यते यजुर्वेदे

**येन सूर्यज्योतिषा बाधसे तमो जगच्च विश्वमुदियर्षि भानुना।**
**तेनास्मद्विश्वामनिरामनाहुतिमपामीवामप दुष्ष्वप्न्यं सुव॥**[14]

**शारीरिकोत्कर्षतायै सूर्यस्य भूमिका**

शरीरे भवमिति व्युत्पत्या शरीरसम्बद्धं शारीरिकं तद्गतमुत्कर्षं शारीरिकमुत्कर्षमिति बहुधा व्यज्यते यतः घटेषु प्राणानामन्तर्भावः आदित्ये प्रतिपद्यते यतः आदित्यादेव पर्जन्यं तस्मादन्नमन्नात् प्रजाः सर्वाः सम्भवन्ति। अतस्तावत् सर्वादौ प्राणानां नियन्त्रकत्वेनास्य सूर्यस्य प्रसक्तपर्यवसानं बहुधा स्वीक्रियते। प्राचीनसाहित्ये कर्णशाम्बाद्युपाख्यानानां पौराणिकपर्यवसानात्सूर्यस्याद्यपूज्यत्वं शारीरिकप्रकर्षार्थे उपपद्यते। व्याधीनां निदाने चिकित्साशास्त्रे भैषजविज्ञाने च सूर्यरश्मेः प्राचीनोल्लेखः प्राणेषु प्राणाधेयत्वेन श्लाध्यते। उच्यते अथर्ववेदे -

**अवपतन्तीरवदन् दिव ओषधयस्परि**
**यं जीवमश्मवामहे न स रिष्यति पुरुषः॥**[15]

प्राचीनसाहित्ये शारीरिकप्रकर्षतायै वनस्पतीनां योगविद्यायाः मन्त्रशक्तेः आध्यात्मिकभावानां प्रमुखं रहस्यं सूर्ये सङ्क्रमणे सूर्यरश्मिषु प्रातः सूर्यस्य सान्निध्ये च प्रसज्यते। वनस्पतीनामौषधीनां प्राणाः सूर्ये सन्निहिते सति योगशास्त्रस्यापि प्रसक्ति सूर्यनमस्कारादिप्रातःसायं नित्यमग्निहोत्रतर्पणात्पूर्वं प्राणायामे च उपपद्यते। उच्यते –

**या बभ्रवोयाश्च शुक्रा रोहिणीरुत पृश्नयः।**
**असिक्नीः कृष्णा ओषधीः सर्वा अच्छावदामसि॥**[16]

असावादित्यः सायंप्रातः आहुतिभिरुपास्यमानदेवो यश्च प्रजानां धारणार्थे पालनपोषणार्थे बहुधा समुपतिष्ठते। यतः आदित्यादेव वृष्टिस्तस्मादन्नं ततः प्रजाश्च जज्ञिरे। यश्च समेषां जीवानां शरीरे प्राणानाम् आधानं विदधाति।

**अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते।**
**आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजाः॥**[17]

अन्यच्च सर्वलोकस्य सुष्ठुप्रकाशत्वं पृथिव्यादिलोकेषु प्राणाधेयकत्वं ग्रहनक्षत्रमयनवासरादीनां निर्णायकत्वं सूर्ये प्रसज्यते।

**अष्टौ व्यख्यत् ककुभः पृथिव्यास्त्री धन्व योजना सप्त सिन्धून्।**
**हिरण्याक्षः सविता देव आगाद्दधद्रत्ना दाशुषे वार्याणि॥**[18]

सूर्यस्य रश्मयो शारीरिकप्रकर्षतायै सुतरां भ्राज्यन्ते। यतोऽस्य नीललोहितवर्णः क्षयरोगनाशकः, नीलवर्णः पित्तसम्बन्धिरोगनाशकः, हरिद्वर्णो वातसम्बन्धिरोगनाशकः, पीतवर्णः कफजन्यहृदयोदररोगनाशकः, नारङ्गीवर्णः कफजनितव्याधिनिवारणमानसिकदुश्चिन्तानाशको, लोहितवर्णः अत्युष्णकफवातगतरोगनाशकश्च भवति। प्राचीनचिकित्साशास्त्रे सूर्यरश्मयो रोगानां दूरीकरणाय अपि बहुधा प्रयुज्यते स्म। प्राचीनसाहित्ये सायंप्रातः सूर्यनमस्कारस्य विधानमभिहितं यच्च शारीरिकमाध्यात्मिकोन्नतये सुतरां सोपानक्रमेण श्वासक्रियादिविधानमाध्यमेन हस्तपादयोः संनहनं विधीयते। अनेन योगरूपाख्यस्य प्रसक्ततां लक्ष्यते। एवमादित्यहृदयाख्ये स्तोत्रे कथ्यते यत् –

**सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम्।**
**चिन्ताशोकप्रशमनमायुर्वर्धनमुत्तमम्॥**[19]

**आध्यात्मिकमुत्कर्षतायैः सूर्यस्य प्रसक्तिः**

नित्यनैमित्तिककाम्यादिकर्मसमूहेष्वविरतमविश्रान्तमैहिकामुष्मिकफलसिद्धये च सर्वे मानवाः सदैव प्ररोहिताः सन्तः आध्यात्मिकतां प्रति प्रत्यङ्मुखाः भूत्वा इन्द्रियसुखगतभ्रान्त्या विचरन्ति। तस्माद् विरतो भूत्वा पारमार्थिकसत्तायाः प्राप्तये इन्द्रियनिग्रहपूर्वकं जपहोमतपसश्चारणं शुद्धचित्तं कृत्वा सम्पादयेत्। अतः एतन्निमित्तं शुद्धिं तु सुतरां काङ्क्ष्यते। परन्तु शुद्धिस्तु केवलं स्नानादिकर्मणि न सञ्जायते अपितु कल्मषानां दूरीकरणाय प्रातःसायं च अग्निहोत्रमनुष्ठानं कृत्वा सूर्याय अर्ध्यप्रदानं नित्यकर्मत्वेन द्विजैः सुतरां कर्त्तव्यम्।

आध्यात्मिकतत्त्वैरहरहः संसेव्यमानैः शुद्धतामं पवित्रताञ्च विदधतुमादित्यस्य प्रभा रश्मयः प्रातः अच्छिद्रेण पुनातीति प्राचीनसाहित्ये बहुधा श्लाघ्यते। मानसिकशुद्धतामादाय आध्यात्मिकोत्कर्षतां प्रति असावादित्यः ज्योतिस्त्वेन बिभाति। अतः स्पष्टमिदमभिप्रयन्ति यदाध्यात्मिकतायाः हेतुभूतसूर्यः प्रकाशैः सर्वान् जन्तून् पुनाति। यतः कथ्यते –

**पवित्रे स्थो वैष्णव्यौ सवितुर्व प्रसव उत्पुनामि।**
**अच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः॥**[20]

यथा प्रकाशैरादित्यवन्तरश्मिभिरन्धकारस्य ज्योतिस्त्वेन सर्वलोकप्रकाशकारणभूतो भवति तद्वत् तेनेदं पापं सदैव दूरीभूतञ्च भवति तस्मात् कारणात् तेन प्रकाशेन सकलस्य जीवजातस्य कालुष्यं

दूरीकृत्य आसंसारे क्लेशानां रोगाणां च विनाशं कृत्वा ऐहिक-माध्यात्मिकदिशा तमः दूरीकरोति। उच्यते

**येन सूर्यज्योतिषा बाधसे तमो जगच्च विश्वमुदियर्षि भानुना।**
**तेनास्मद्विश्वामनिरामनाहुतिमपामीवामप दुष्वप्न्यं सुव॥**[21]

मनः प्राणाः इन्द्रियाणि च समाहृत्य आत्मनि प्रसक्तपर्यावसनत्वं शुचियुक्तश्चेतसो भवतीति सुतरां शास्त्रीयसम्मतिः। सर्वान् स्वरश्मिभिः सुतरां पवित्रीकृत्य आत्मनि उत्कर्षं साधयति। तदुक्तं काण्वसंहितायां

**अद्भ्यः क्षीरं व्यपीवत् कुङ्गाङ्गिरसो धिया। ऋतेन सत्यमिन्द्रियं.....हँसः शुचिषत्॥**[22]

प्रातः सायं सूर्योपासनायं सकलं भद्रं कल्याणमाप्नुयादिति शास्त्रीयविधावपि प्रमाणभूतमादित्यहृदयस्तोत्रं रामस्य विजययात्रा-सिद्धिनिमित्तं वाल्मिकिरामायणे प्रसज्यते। आदित्यमभिध्यायन् ब्राह्मणो नित्यं प्रातः अग्निहोत्रमग्निष्टोमाद्यग्निचयनजातकर्माणि कृत्य नित्यनैमित्तिकफललाभं कुरुते। उच्यते तत्र –

**उद्यन्तमस्तं यान्तमादित्यमभिध्यायन् कुर्वन्-**
**ब्राह्मणो विद्वान् सकलं भद्रमश्नुते।**[23]

अन्यच्च **येन सूर्यज्योतिषा बाधसे तमो जगच्च विश्वमुदियर्षि भानुना** इति मन्त्रेण सर्वप्रकाशात्मकसूर्यः आत्मोत्कर्षं साधयितुं समस्तविश्वं प्रकाशयति प्रचोदयतीति श्रूयते। अस्यापि प्रेरणया कुण्डलिनीशक्तेः प्रबोधनं जागरणञ्च भवति। यथा विद्युत् शक्त्या सकलं साक्षात् प्रतिभासते तद्वत् तया शक्त्या सर्वस्य आत्मिकप्रसक्तौ कुण्डलिन्याः प्रसारणं सञ्जायते। एतस्मिन् प्रसङ्गे महायोगविद्यायां जीवशक्त्याः मूलाधारस्थं ब्रह्मतेजोमयशक्तिः परब्रह्मरूपी प्रसज्यते। आधारस्वाधिष्ठानमणिपुरचक्रादीनामुपस्मारणं सूर्यनमस्कारादियोगविद्यया साध्यते।

**शब्दब्रह्ममयी देवी एकानेकाक्षराकृतिः॥**
**शक्तिकुण्डलिनी नाम विसतन्तुनिभा शुभा।**[24]

**उपसंहारः**

शास्त्रीयमनुशीलनपरम्परायामादित्याख्यदेवस्य सकलानां जन्तूनां सर्वप्रेरकत्वेन प्राणाधेयकत्वेन प्रसक्तिः श्लाघ्यते। शारीरिकमानसिक-माध्यात्मिकोत्कर्षतानिमित्तं चित्तशुद्धिकायशुद्धिरित्यादीनामावश्यकं मनुते। अतः प्रातःसायं सूर्यस्य नित्यमग्निहोत्राद्यनुष्ठानपूर्वकं जपप्राणा-याममन्त्रपाठादीनां सकलानां कर्मणां सूर्यात्मकप्रतिपत्तौ परिभूयते। अतः सूर्यस्य सकलकर्मणामाद्यपरिभावकत्वमत्र सूच्यते। सूर्यं विहाय शारीरिकोत्कर्षता आध्यात्मिकोत्कर्षता च कदाचिदपि न प्राप्यते। यतः सूर्यः एव अस्याः शक्तेः आधारो भूतो वर्तते।

**सन्दर्भग्रन्थसूची**


१.ऋग्वेदसंहिता,श्रीमत्सायणाचार्यविरचितमाधवीयवेदार्थप्रकाशसहिता, श्रीमन्मोक्षमूलरभट्टः, कृष्णदास अकादमी, वाराणसी
२. आदित्यहृदयस्तोत्रम्, ठाकुरप्रसाद एन्ड सन्स, वारणासी
३. निरुक्तम्, यास्काचार्यः, मुकुन्दझा शर्मा, चौखम्बा, वाराणसी
४. ईशादि नौ उपनिषद्, गीताप्रेस, गोरखपुर, २००७
५. यजुर्वेदः, चौखम्बा विद्याभवन, वाराणसी, ९८२
६. महाभारत, रूपान्तरकारः रामचन्द्र वर्मा, भारतीय प्रकाशन संस्थान, गाजियाबाद, प्रथमसंस्करणम्, १९८८
७. सूर्य देवता, शशि तिवारी, मेहरचन्द लछमनदास, पब्लिकेशन्स, नई दिल्ली, ११०००२
८. बृहद्देवता, शौनक, सं. रामकुमार राय, चौखम्बा सुरभारती प्रकाशन, वाराणसी, १९६३
९. याज्ञवल्क्यस्मृतिः, मिताक्षरासहिता, नागप्रकाशक, दिल्ली, २०११
१०. सूर्यसिद्धान्तः, सुधावर्षिणी, म. प. सुधाकर द्विवेदी, १९८७


**सङ्केताक्षरसूची**

1. छान्दो. ३.१९.११
2. य. वे ३३.१.१९
3. निरुक्त. १२.२.१४
4. ऋग्वेद. ९.११४.३
5. निघण्टु३.१
6. विष्णुसहस्रनाम - १०७
7. बृहद्देवता. ७.१२८.१
8. पा.३.१.११४
9. सूर्यसिद्धान्तः संहाराध्याय. १५
10. सू.सि.संहाराध्याय. १५
11. सूर्यस्तत्रो अंश ३.अध्याय ५
12. य. वे. ३१.१८
13. ऋ. सं. ८.२९.१०
14. ऋ .सं .वे .१०४.३७.
15. भै. सू. १०.९७.१७
16. अ.वे. ८.७.१
17. म.स्मृ.३.७६
18. य. वे ३३.१.१८
19. आ. हृ. स्तो. ५ (वाल्मीकिरामायणम्)
20. य. वे १.४.१
21. ऋ. वे. सं. १०.३७.४
22. य. वे २१.५.२
23. तै. आ. प्र. २. अ. २
24. महायोगविज्ञानम्,